No. 85

अथशारदातिलकोक्तपुरश्चरणप्रारंभः पत्र १७

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

श्रीगणपतयेनमः श्रीअर्कनारायनमः ॐ अथगायत्री
तिलकेगायत्रीपुरश्चरणविधिप्रारंभः अथावक्ष्यामिगाय
त्रीतत्वरूपंचयीमयीं यथाप्रकाशयतेब्रह्मसच्चिदानंदल
क्षणे १ प्रणवाद्याव्याहृतेयः सप्तस्युस्तत्पदादिकाः चतुर्वि
शत्यक्षरात्मागायत्रीशिरसान्विता सर्ववेदोधृतःसारोम
त्रोयंसमुदाहृतः ब्रह्मादेव्यादिगायत्री परमात्मासमीरितः
ऋष्याद्याःप्रणवस्यैतेमुनिभिःपरिकीर्तिताः जमदग्निर्भरद्वा १

जश्चयुगौतमकाश्यपान् विश्वामित्रवसिष्ठाख्यांव्याहृती
नामृषीन्विदुः गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तयस्मृताः
त्रिष्टुप्जगत्यौछंदांसिकथितानिमनीषिभिः सप्तार्चिरनि
लःसूर्योवाक्पतिर्वरुणोवृषाः विश्वेदेवाःक्रमादासांदेवताः
परिकीर्तिताः गायत्र्यामुनिरख्यातोविश्वामित्रोमहाऋ
षिः गायत्रीछंदइत्युक्तेसकलादेवतास्मृताः शिरसोस्यमु
निर्ब्रह्मा छंदोदेव्यादिकास्मृताः गायत्रीपरमात्मास्यादेव

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ताकथिताबुधैः व्याहृतीससप्तारणधाहृन्मुखांसोरयुग्मके जग
रेन्यस्यमंत्रान्गायत्र्यर्णान्ततोन्यसेत् यत्संधसिकयोनाभौ
हृत्कंठभ्रुजसंधिषु मुखनासाक्षिकर्णभ्रूमस्तके
पुनः पश्चात्तोतरस्याम्यपाकर्ध्वक्रमेषुसाधकः पदानिर
ग्नाधिन्यस्येद्दशस्थानेषुमंत्रवित् शिरोभ्रूमध्यहृद्वक्त्रकंठहृ
नाभिगुह्यके जानुनोःपदयोयुग्मेतत्पदाच्छिरसिन्यसेत् ब्रह्म
वेहृदयंप्रोक्तंविष्णवेशिवईरितं शिरवारुद्रायकक्त्वमीश्वराय २

समीरितं नेत्रंसदाशिवायोक्तमस्त्रंसर्वात्मानःस्मृतं षडंगान्ये
वमुक्तानियथास्थानंप्रविन्यसेत् मुक्ताविद्रुमहेमनीलधवल
श्यामैर्मुखैस्त्र्यक्षमेर्युक्तामिंदुकलानिबद्धमुकुटांतत्वार्थवर्णा
त्मकां गायत्रींवरदाभयांकुशकशाश्वेतंकपालंगुणं शंखंच
क्रयथाराविंदयुगलंहस्तैर्वहंतिंभजेत् प्राणायामंपुरास्कृत्वा
गायत्रींसंध्ययोर्जपेत् ससव्याहृतिसंयुक्तांगायत्रीशिरसा
न्वितां त्रिरभ्यसेथान्प्राणधारयेद्यतमानसः प्राणायामोय

मारव्यातोसमस्तदुरितापहः॥ व्याहृतीयंत्रः संयुक्तोगायत्रीदी
क्षितोजपेत् तल्लक्षविधानेनभिक्षाशीविजितेंद्रियः॥क्षी
रोदनेतिलान्दूर्वान्क्षीरद्रुमसमिद्वरान्॥एथकस्रुक्स्रुवान्वित
यंजुहुयान्मंत्रसिद्धये॥विधायमंडलंकृत्वात्रिकोणोज्वलक
र्णिकं॥सोरपीठंयजेत्तत्रदीप्यादानवशक्तिभिः॥दीप्तास्
क्ष्माजयाभद्राविभूतिर्विमलाप्रिया॥अमोघाविद्युतःस
र्वतोमुखीसर्वयोनयः॥मूलमंत्रेणकृत्तायांमूर्त्तौदेवीप्रपू

जयेत्॥कोणेषुत्रिषुसंपूज्यब्रह्माद्याःशक्तयोबहिः॥आदित्याद्या
स्तनःपूज्याउषादिसहिताःक्रमात्॥आदित्याद्याश्चतस्रोद्याश
क्तयःकोणपन्नगाः॥आदित्यश्चरविर्भानुःसूर्योभास्करएव
च॥उषाप्रज्ञाप्रभासंध्याश्चशक्तयःपरिकीर्त्तिताः॥ततःषडं
गान्यर्च्यैकेसरेषुयथाविधिः॥प्रह्लादिनींप्रभांपश्चान्नित्येवि
श्वंभरांपुनः॥विशालिनींप्रभावत्योविप्राशांतांततःपरां॥का
मादुर्गासरस्वतीविद्यारूपांतथापरां॥विशालासंज्ञितांमीशां

व्यापिनीं विमलां यजेत् ॥ तमोपहारिणीं सूक्ष्मां विश्वयोनिं ज
यावहां ॥ पद्मालयां परां शोभां पद्मरूपां नमो र्चयेत् ॥ ब्रह्मा
द्याश्शक्तयो बाह्या पूजयेत्प्रोक्तलक्षणाः ॥ ततोभ्यर्च्य गृहान्
बाह्ये शक्राद्यान्सायुधैः सह ॥ इत्थमावरणैर्देवीं दशभिः परि
पूजयेत् ॥ धर्मार्थकाममोक्षाणां भोक्त्री स्याद्द्विजसत्तमः
तत्त्वसंख्यासहस्राणि मंत्रविज्जुह्वयान्निशेः ॥ सर्वपापवि
निर्मुक्तो दीर्घमायुश्चविंदति ॥ आयुर्घृतेसाज्यहविषाकेव ४

लेनाथ सर्पिषा ॥ दूर्वान्नि कैस्तिलैर्मंत्रैर्जुह्वयान्नि सहस्रकं
अरूणाब्जैस्त्रिमध्वाक्तैर्जुह्वयादयुतंततः ॥ महालक्ष्मीर्भ
वेत्तस्यषण्मासान्नात्रसंशयः ॥ ब्रह्मश्रियेप्रजुह्वयात्प्रत्य
ङ्गैर्ब्रह्मवृक्षजैः ॥ बह्वनाकिमिहोक्तेनयथावत्साधुसाधि
ना ॥ द्विजन्मनामियंविद्यासिद्धाकामदुघामता ॥ ॥ इ
तिनारदानिलकेगायत्रीपुरश्चरणकारिकासमाप्ता ॥ ॥
अथसंक्षेपप्रयोगलिख्यते ॥ ॥ पूर्वप्रायश्चित्तंसार्धद्वं

कृत्वा गायत्रीपुरश्चरणेऽधिकारसिध्यर्थंलक्षसंख्यागायत्री
जपंकृत्वा॥ ततःगायत्रीमंत्रशुध्यर्थंअयुतजपंकृत्वा ततःगा
यत्रीमंत्रशुध्यर्थंगायत्रीशुयुतंजपेत्। ततःश्रीअर्थंचतुर्विंशति
लक्षात्मकगायत्रीपुरश्चरणाख्यंकर्मकरिष्ये॥पुण्याहवाचनं
मातृकापूजनंनांदीश्राद्धंआचार्यऋत्विग्वर्णनंचकरिष्ये॥म
धुपर्कादिभिःपूजयेत्॥ततःभूतशुद्धिंपवनपावनेचन्यासान्कृ
त्वा॥ततःसर्वतोभद्रमध्येदेवतांस्थापयेत्॥ऋत्विजोध्यानं ५

कृत्वा॥ आरंभदिवसादिसमाप्तिपर्यंतंप्रत्यहंसमानजपंकु
र्युः॥ अंतरालेव्रतचर्याहविष्यभोजनंत्रिषवणस्नानंजपश्चतांशो
नहवनतद्दशांशोनतर्पणंतद्दशांशोनमार्जनंतद्दशांशोब्राह्मण
भोजनं॥ ॥इतिन्नारदातिलकेगायत्रीपुरश्चरणविधिः॥अथ
प्रयोगः॥सर्षपान्विकीर्यायद्यत्रमिति।शुचीवेतिपंचगव्येनस
र्वांगंप्रोक्ष्य॥आपोहिष्ठेतिशुद्धोदकं।सूर्यःसोमोयमःकालःसं
ध्येशूनान्यहक्षयः॥पवनोदिक्पतिर्भूमिराकाशंरवेचरामराः॥ब्र

त्रासनमास्थायकल्पध्वमिदंसन्निधमिनिपवेत्॥ततोआ
पोहिष्टेतिस्रिः ३ ततोन्विदं॰ ३ ऋतंचसत्यं॰ ३ स्वस्तिनइत्या
द्याश्वेपवेत्॥ततोभूतशुध्यादिऋष्यादिगायत्रीन्यासंकुर्यात् तद्य
था ब्रह्मणेऋषयेनमः शिरसि॥गायत्रीछंदसेनमः मुखे॥स
वितादेवतायैनमः हृदये॥पुनः॥जमदग्निभरद्वाजभृगुगोतम
कश्यपविश्वामित्रवसिष्ठेभ्योनमः॥शिरसि॥गायत्र्युष्णिगनुष्टु
प्बृहतीपंक्तीत्रिष्टुब्जगीछंदोभ्योनमः मुखे॥अग्निर्वायुसूर्यगुरु ६

वरुणेन्द्रविश्वेभ्योदेवेभ्योदेवताभ्योनमः हृदये॥पुनः ब्रह्मणे
नमः॥शिरसि॥देवीगायत्रीछंदसेनमः॥मुखे॥परमात्मादेवतायै
नमः॥हृदये इतिविन्यस्य अथप्राणायामः ओंभूः ओंभुवः
ओंस्वः ओंमहः ओंजनः ओंतपः ओंसत्यं ओंतत्सवितुरितिगा
यत्र्यंते ओंआपोज्योतिरसोमृतंब्रह्मभूर्भुवःस्वरोम् इतिप्राणाया
मंकृत्वा विश्वामित्रऋषयेनमः शिरसि गायत्रीछंदसेनमः मु
खे सवितृदेवतायैनमः हृदये इतिविन्यस्य ओंब्रह्मणेहृदया

यनमः॥विल्ववेशिरसेस्वाहा ॐरुद्रायशिखायैवषट् ॐ
ईश्वरायकवचायहुं ॐसदाशिवायनेत्रत्रयायवौषट् ॐस
वत्मिनेअस्त्रायफट् इतिषडंगंविधाय ॐभूःहृदयायन
मः ॐभुवःमुखायनमः ॐस्वःदक्षिणांसायनमः॥ ॐमहः
वामांसायनमः ॐजनःदक्षिणोरवेनमः॥ ॐतपःवामोरवेन
मः ॐसत्यंजठरायनमः॥अथाक्षरन्यासः ॐतंनमःपादां
गुलिमूलयोः॥ॐसंनमःगुल्फयोः ॐविंनमःजानुनोः ॐ ७

तुंनमःऊरुमूलयोः ॐवंनमःकट्योः ॐरेंनमःनाभौ ॐणिंन
मःहृदि ॐयंनमःकंठे ॐधंनमःकरांगुलिमूलयोः ॐगोंनमः
मणिबंधयोः ॐदेंनमःकूर्परयोः ॐवंनमःभुजमूलयोः ॐ
स्येनमःमुखे ॐधिंनमःनासिकायां ॐमंनमःकपोलयोः
ॐहिंनमःनेत्रयोः ॐधिंनमःकर्णयोः ॐयोंनमःभ्रुवोः ॐ
योनमःशिरसि ॐनंनमःपूर्ववक्त्रायां ॐत्रेनमःदक्षिणवक्त्रा
यां ॐचोंनमःपश्चिमवक्त्रायां ॐरंनमःउत्तरवक्त्रायां ॐया

तन्नमः ऊर्ध्ववक्त्रायां॥अथपदन्यासः ॐतत्शिरसि॥ॐसवि
तुःनेत्रयोः॥ॐवरेण्यंमुखे ॐगर्भःकंठे ॐदेवस्यहृदि ॐ
धीमहिनाभौ ॐधियःगुह्ये ॐयःजानुनोः ॐनःपादयोः
ॐप्रचोदयात्सर्वांगे पुनःशिरसि ॐमापोज्योतीरसोम्
तंब्रह्मभूर्भुवःस्वरोम्सर्वांगेव्यापकंन्यसेत्॥ततोस्त्रादि
न्यासः॥ॐब्रह्मणेहृदयायनमः॥ॐविष्णवेशिरसेस्वाहा॥
ॐरुद्रायशिखायैवौषट्॥ॐईश्वरायकवचायहुं॥ॐ ८

सदाशिवायनेत्रत्रयायवौषट्॥ॐसर्वात्मनेअस्त्रायफट्
ततःषडंगंन्यासंकुर्यात्॥ॐतत्सवितुर्ब्रह्मात्मनेअंगुष्ठाभ्यां
नमः॥ॐवरेण्यंविष्ण्वात्मनेतर्जनीभ्यांनमः॥ॐभर्गोदे
वस्यरुद्रात्मनेमध्यमाभ्यांनमः॥ॐधीमहीमायात्मनेअना
मिकाभ्यांनमः॥ॐधियोयोनःकालात्मनेकनिष्ठिकाभ्यांनमः
ॐप्रचोदयात्सर्वात्मनेकरतलकरपृष्ठाभ्यांनमः॥एवंह
दयादि॥अथध्याने॥मुक्ताविद्रुमहेमनीलधवलछायैर्मु

खैस्त्र्यक्षपेर्युक्तामिंदुनिबंधरत्नमुकुटांतत्वार्थवर्णात्मि
कां॥गायत्रीवरदाभयांकुशकशाःशूलंकपालंगुणंशंखंच
क्रमथारविंदयुगलंहस्तैर्वहंतिंभजे॥सुमुखंसंपुटंचैववि
ततंविस्तृतंतथा॥द्विमुखंत्रिमुखंचैवचतुष्पंचमुखंतथा॥ष
ण्मुखंचाधोमुखंचैवव्याप्यमंजलिकंतथा॥शकटंयमपा
शंचग्रथितंचोन्मुकंतथा॥प्रलंबंमुष्टिकंचैवमत्स्यःकूर्मव
राहकं॥सिंहाक्रांतंमहाक्रांतंमुद्गरंपल्लवंतथा एतामुद्रान् ९

जानातिगायत्रीनिष्फलाभवेत्॥ईशान्यांहस्तमात्रंवेदिंकृत्वा
तदुपरिसर्वतोभद्रंविलिख्य॥तत्रब्रह्मादीनावाहयेत्॥ततः
वेद्यांमध्येमहीद्यौरित्यादिकलशस्थापनंपूर्णपात्रंनिधानं
तैकृत्वा॥तन्मध्येंपटेभूर्जपत्रेवायंत्रंविलिख्यमध्येरत्ने
तद्दहिःत्रिकोणं तद्बहिर्वृत्तंसाष्टदलं तद्बहिश्चतुष्कारं एवं
यंत्रंसंपाद्य॥सौरपीठेदीप्तादीनावापयेत् दीप्तायैनमः सू
क्ष्मायैनमः॥जयायैनमः॥भद्रायैनमः॥विभूत्यैनमः विम

लायैनमः॥अमोघायैनमः॥विद्युतेनमः सर्वतोमुखैनमः
तत्रगंधादिभिरर्चयेत् ततःकलशस्थापनंशंखेघंटांचसंपू
ज्य॥पूजासामग्रीआत्मानंचत्रिःप्रोक्षयेत्दक्षिणेघृतदीपं
वामेतैलदीपंस्थापयेत् अथदेव्यावाहनं॥॥गायत्र्यामं
त्रमध्येगायत्रीमंत्रंलिखित्वासुवर्णप्रतिमांवापरिकल्पयेत्
अभ्युतारणंपंचामृतस्नानंप्राणप्रतिष्ठांचकुर्यात् मूलमं
त्रेणआवाहनमुद्रायायंत्रकल्पितान्॥मूर्तिनिवेश्यसाव १०१

रणंध्यात्वाआवाहनादिमुद्राःप्रदर्शयेत्॥आवाहनी स्थाप
नी संनिधानीसंरोधनी संमुखीकरणी॥अवगुंठिना संक
लीकरणी अमृतीकरणी परमीकरणी प्रार्थनी मुक्तावि
द्रुमहेमेइतिध्यानंकृत्वा गायत्रीमंत्रेणपुरुषसूक्तेनचदेव्याः
षोडशोपचारैःपूजांकृत्वा पुष्पांजलिंदत्वाश्रीदेवीप्रसन्नां
विभाव्यतदाज्ञयाआवरणदेवतापूजांकुर्यात् ॐह्रींगाय
त्र्यैनमः पूर्वे ओंह्रींसावित्र्यैनमः॥नैऋत्यकोणे ॐह्रींस

रस्वत्यैनमः॥वायुकोणे कार्णांतराणे॥वह्निवरुणेशदिक्षु
ब्रह्मणेनमः॥ॐविष्णवेनमः ॐरुद्रायनमइतिसंपूज्य पु
ष्पांजलिंगृहीत्वा॥मूलमंत्रमुच्चार्य अभीष्टसिद्धिंमेदेहीश
रणागतवत्सले भक्त्यासमर्पयाम्यतत्प्रथमावरणार्च
नं इतिपुष्पांजलिंदत्वेतिप्रथमावरणं अथद्वितीयावरणं
कर्णिकायाःमध्ये॥आदित्यायनमः परिधौचतुर्दिक्षुरवये
ॐभानवे ॐसूर्यायः ॐभास्करायः विदिक्षुपत्रेषु ओं ११

ङ्कायैनमः ओंप्रज्ञायैनमः ओंप्रभायैनमः ओंसंध्यायैन
इतिगंधादिनासंपूज्य॥अभीष्टसिद्धिंमेदेहीत्यादिद्वितीया
वरणार्चनमितिपुष्पांजलिंदद्यात् द्वितीयावरणं अथतृती
यावरणं दलाद्यग्निःकेसरेषुअष्टपत्रेषुक्रमात्संचावरणं अ
ग्निईशानिर्ऋतिवायुवरुणेंदुदिक्षुपत्रेषु ॐब्रह्मणेहृदया
यनमः ॐविष्णवेशिरसेस्वाहा ॐरुद्रायशिखायैवषट्
ॐईश्वरायकवचायहुं ॐसदाशिवायनेत्रत्रयायवौषट्

ॐसर्वात्मनेअस्त्रायफडितिनमः गंधादिनासंपूज्य॥अभीष्ट
त्यादितृतीयावरणार्चनमिति अथचतुर्थावरणं तदुपरिपू
र्वदलेमारभ्येशानीपर्यंतंक्रमाद्दलेषु ॐप्रह्लादिन्येनमः
ॐप्रभायैनमः ॐनित्यायैनमः ॐविश्वंभरायैनमः ॐ
विलासिन्यैनमः ॐप्रभावत्यैनमः ॐजयायैनमः ॐशो
भायैनमः॥इतिसंपूज्य आभीष्टेत्यादि इतिचतुर्थावरणा
र्चनमिति अथपंचमावरणं तदुपरिपूर्वदलमारभ्य ॐ १२

कीर्तायैनमः ॐदुर्गायैनमः ॐसरस्वत्यैनमः ॐविष्णुरूपा
यैनमः ॐईशायैनमः ॐव्यापिन्यैनमः ॐविमलायैनमः
इतिसंपूज्य आभीष्टेति पंचमावरणार्चनं अथषष्ठावरणा
र्चनं तदुपरिपूर्वदलमारभ्य ॐनमोपहारिण्यैनमः ॐस्व
क्षायैनमः ॐविश्वयोनयेनमः ॐजयावहायैनमः ॐप
द्मालयायैनमः ॐपरायैनमः ॐशोभायैनमः ॐपद्मरू
पायैनमः इतिसंपूज्य आभीष्टेति षष्ठमावरणार्चनं अ

थसप्तमावरणं तदुपरि पूर्वदलमारभ्य॥ ॐ ब्राह्म्यैनमः ॐमा
हेश्वर्यैनमः ॐकौमार्यैनमः ॐवैष्णव्यैनमः ॐवाराह्यैन
मः ॐइंद्राण्यैनमः ॐचामुंडायैनमः ॐअरुणायैनमः
इतिसंपूज्य॥आभीष्टेति सप्तमावरणार्चनं अथअष्टमा
वरणं पूर्वादिदिक्षुपत्राग्रेषु ओंसोमायैनमः ओंभौमायनमः
ॐबुधायैनमः ओंबृहस्पतयेनमः ओंशुक्रायनमः ओंश
नैश्चरायनमः ओंराहवेनमः ओंकेतवेनमः इतिसंपूज्य॥ १३

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC S

आभीष्टेति अष्टमावरणार्चनमिति अथनवमावरणं तदुप
रिचतुरस्रेपूर्वादिदिक्ष्वधोर्ध्वंच ओंलंइंद्रायनमः ओंरंअग्न
येनमः ओंमंयमायनमः ओंक्षंनिर्ऋतयेनमः ओंवंवरुणा
यनमः ओंयंवायवेनमः ॐसंसोमायनमः॥ओंहंईशानाय
नमः ओंक्रींईअनंतायनमः अंलोंब्रह्मणेनमः इतिसंपूज्य
आभीष्टेति नवमावरणं अथदशमावरणं तदुपरिचतुरस्रे
पूर्वादिदिक्षुधोर्ध्वंच॥ओंवंवज्रायनमः ॐशंशक्तयेनमः ओं
दंदंडायनमः॥ओंखंखड्गायनमः ओंपंपाशायनमः॥ओंअं

अंकुशायनमः ओंगंगदायैनमः ओंत्रिंत्रिशूलायैनमः ओंचंच
क्रायैनमः ओंश्रंश्रंबुजायनमः॥ इतिसंपूज्य आभीष्टनि॥
दशमावरणार्चनं सर्वास्तमावरणदेवतानांपुनरुपचारैरभ्य
र्चप्रसंगादेवीविभाव्यस्वात्मानंदेव्यात्मरूपंध्यात्वा इतिसंपूज्य
देवींगुरुमंत्रात्मानंज्योतिरूपेवोक्तेविभावयेदितिपूजाविधिः
अथजपः पूर्वोक्तरूपेणपुण्यतिथौ० यजमानस्यपुरश्चरणे
जपसंख्यापरिपूर्णार्थंचतुर्विंशतिशतेत्रिसहस्रंवागायत्रीजप
महंकरिष्ये पूर्वोक्तरूष्यादिन्यासंकृत्वा ध्यात्वामनसापंचोप
चारैःसंपूज्याहरहः समाप्तिपर्यंतंसमानजपंकुर्युः मूलमंत्रेण १४

चार्यं॥ लंपृथिव्यात्मनेनारायणायगंधंपरिकल्पयामि हंआका
शात्मनेवासुदेवायपुष्पंपरिकल्पयामि यंवायवात्मनेसंकर्षणा
यधूपंपरिकल्पयामि रंअग्न्यात्मनेप्रद्युम्नायदीपंपरिकल्पयामि
वंअमृतात्मनेअनिरुद्धायनैवेद्यंपरिकल्पयामि सांसलिलमहा
मायेसर्वशक्तिस्वरूपिणी चतुर्वर्गस्त्वयिन्यस्तःस्तस्मान्मेसिद्धि
दाभव। इतिमालांसंप्रार्थ्य ओंअविघ्नंकुरुमालेत्वंमालामादा
यसवितारंध्यायन् हृदयसमीपेमालांधारयन् एकाग्रचित्ते
मध्यंगुलिमध्यपर्वणिनिधायोन्नतगायत्रःप्रत्याहनिसप्रण

व्याहृतिपूर्वकंगायत्रीमंत्रमुच्चारयन् मध्यंदिनावधिजपेत्॥गा
यत्र्याविश्वामित्रः सविताग्रायत्री जपेविनियोगः पुनःत्वंमालेस
र्वदेवानांप्रीतिदाशुभदामता श्रीयंकुरुयमेभद्रंयशोवीर्यंचस
र्वदा युग्मानियुग्मगोत्रीत्वंगृहाणास्मत्कृतंजपं सिध्भिर्भवतु
मेदेवित्वत्प्रासादान्महेश्वरी॥१॥इतिशिरसिमालांनिधायजपं
समर्प्यपुनःषडंगेन्यासंकुर्यात्इति मुद्रांकुर्यात् सुरभिज्ञानशू
पंचयोनिःकूर्मोथपंकजे लिंगेनिर्याणमुद्रांचजपांतेष्टोप्रदर्शये
त् इतिजपविधिः एवंसमाप्तेजपेनित्यादिसंकीर्त्यकृतस्य

चतुर्विंशतिलक्षात्मकगायत्रीपुरश्चरणजपाख्यंकर्मणाःसांगता
सिध्यर्थंश्रीपरमेश्वरप्रीत्यर्थंचतुर्विंशतिसाहस्रंहोमाख्यंकर्मक
रिष्ये तदंगगणपतिपूजनंकरिष्ये कुंडमंडपेचकृत्वा वास्तुपीठे
नवग्रहपीठेचकृत्वा यथोक्तविधिनाग्निंप्रतिष्ठाप्य ग्रहान्आवा
हनादिकलशस्थापनांतंकृत्वा अन्वाधानंकरिष्ये अस्मिन्वा
हितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वा आत्रप्रधानं आदि
त्यादिग्रहान्प्रत्येकंप्रतिद्रव्यं अर्कादियथालाभसमिद्भरुआज्या
क्तितिभिर्विंशतिसंख्याहुतिभिः पार्श्वदेवतांप्रधानदशांशेनगण
पत्यादिलोकपालांश्चप्रधानदशांशेन मुख्यप्रधानेसवितारंप्रति

द्रव्यंसहस्रत्रयसंख्याकाभिःपायसतिलदूर्वाअश्वत्थोदुंबरवटल
क्षअर्कसमिद्भिराकृतिभिः आवरणदेवताश्चएकैकयाघृताक्तति
लाक्तिभिर्यक्ष्ये॥शेषेणेत्यादिप्रधानहोमंकुर्यात् स्विष्टकृतादि
बलिदानंपूर्णाकृत्यंतकृत्वाशेषंसमाप्याचार्यादिभ्योऽत्विग्भ्यो
दक्षिणांदत्वाशिषोगृहीत्वाभ्यर्चीदक्षिणांदद्यादितिहोमविधिः
। ।एवंहोमंसमाप्यतद्दशांशेनगायत्र्यंतेसवितारंतर्पयामि॥इ
तितर्पणंकार्यं तर्पणदशांशेनगायत्र्यंतेआत्मानंअभिषिंचामि
इतिस्वमूर्द्धनिमार्जनंकार्यं मार्जनदशांशेनब्राह्मणभोजनका
र्यं दक्षिणांदत्वा अशिषोगृहीत्वा मयाकृतस्यस्नुर्विघ्नातिलक्षा १६
त्मकंगायत्रीपुरश्चरणंसंपूर्णमस्त्विति भवंतोब्रुवंतु॥तैःसंपूर्ण

मस्त्वितिवदेयुः॥ ॥इतिशारदातिलकोक्तभट्टांकरात्मजभट्टसांबक
तगायत्रीपुरश्चरणप्रयोगःसमाप्तिमगमत् श्रीअनंतप्रसन्न कृष्ण
पक्षेसप्तम्यांचआश्विनेभानुवासरे नक्षत्राईशिवेयोगेप्रथमेप्रहरे
पंच १ शाकेचसप्तदश्यांचसोम्यएकादशास्तथा पुरश्चरणस्यपुस्त
केशारदंलेखनंशुभं २ अगस्त्यस्यकुलेजाताभाधवोरामआत्मजः
यमुनाकूलसांनिध्यंआकूरंलेखनेकृतं ३
जप २४०००० होम २४०००० तर्पण २४००० मार्जन २४००
ब्राह्मणभोजने · २४०

१७

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

इतिश्रीरसानिलकोक्तगायत्रीपुरश्चरणसमाप्तः॥पत्र १९

LIBRARY
OF THE
BOMBAY
BRANCH
OF THE
ROYAL ASIATIC SOCIETY